# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, ओक्टोबर - २०१९

| | | |
|---|---|---|
| कक्षा- आचार्य-१(SEM-1) | प्रश्नपत्रम् – २ | गुणाः - ७० |
| विषयः - नव्यन्यायः | CC- 4.1.1 | समयः – ०८:०० तः ११:०० |
| दिनाङ्कः – १०/१०/२०१९ | ग्रन्थः – पक्षता | |

**विभागः -१**

**प्रश्नः -१ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत। ०५**

(१) पक्षतानिरूपणे प्रसङ्गसङ्गतिं व्याख्यात।

(२) सन्दिग्धसाध्यधर्मत्वं पक्षत्वमिति प्रतिपादयत।

**प्रश्नः -२ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या। १०**

(१) दीधितेः पक्षतालक्षणं सदलसार्थक्यं प्रतिपादयत।

(२) अत्रोच्यतेत्यनेन संशयत्वपरिष्कारं साधयत।

**विभागः -२**

**प्रश्नः -३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम्। ०५**

(१) मिश्रमते पक्षतात्वं निरूप्य वारयत।

(२) साधकमानाभावस्य पक्षतात्वं निरसत।

**प्रश्नः -४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

(१) संशययोग्यतायाः पक्षतात्वं निरूपयत।

(२) सिषाधयिषायाः पक्षतात्वकथने दोषान्प्रतिपाद्य वारयत।

**विभागः -३**

**प्रश्नः -५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया। ०५**

(१) तल्लिङ्गकानुमितौ अन्यलिङ्गकेच्छायाः प्रतिबन्धकत्वं व्याख्यात।

(२) यत्रानुमित्सानन्तरमित्यादिना स्थलत्रये विशेषणस्य प्रयोजनं स्पष्टयत

**प्रश्नः -६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

(१) सिषाधयिषापदार्थं निरूपयत।

(२) 'सिषाधयिषाविरहसहकृतसाधकमानाभावो पक्षता' इति पक्षतालक्षणं विवृणुत।

**विभागः - ४**

**प्रश्नः -७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०५

(१) लिङ्गभेदेन पक्षताभेदनिरूपणे वैशिष्ट्यं प्रतिपादयत।

(२) अनुमितिप्रतिबन्धकत्वं व्याख्यात।

**प्रश्नः -८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) साध्यसिद्धेः प्रतिबन्धकत्वं साधयत।

(२) सिद्धान्तपक्षतालक्षणं सर्वत्र ससमन्वयं व्याख्यात।

**प्रश्नः -९ अधोलिखितेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

(१) कः सपक्षः?

(२) लिङ्गदर्शनव्याप्तिस्मरणादिना कस्य नाशः?

(३) अनुमितेः प्रतिबन्धकः कः?

(४) पर्वतो वह्निमान् धूमादित्यत्र पक्षतावच्छेदकं किम्?

(५) पक्षतायाः निरूपणे का सङ्गतिः?

(६) कः समुच्चयः?

(७) साधकबाधकमानाभावपदं कस्य परम्?

(८) लिङ्गभेदेन कस्य भेदः?

(९) सिषाधयिषाशब्दव्युत्पत्तिः का?

(१०) साध्यसन्देहः अनुमितौ हेतुर्न वा?

(११) अनुमानं कुत्र प्रवर्तते?

(१२) न्यायदर्शनप्रवर्तकः कः?

(१३) का नाम पक्षता?

(१४) पक्षतावच्छेदकावच्छेदेनानुमितौ का प्रतिबन्धिका?

(१५) सिद्धिकाले अनुमितिर्भवति नवा? कस्मात्?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, ओक्टोम्बर् - २०१९

| | | |
|---|---|---|
| कक्षा- आचार्य-१(SEM-1) | प्रश्नपत्रम् – २ | गुणाः - ७० |
| विषयः - नव्यन्यायः | CC- 4.1.1 | समयः - |
| दिनाङ्कः - | ग्रन्थः – पक्षता | |

## समाधानानि

१. निश्चितसाध्यवान् सपक्षः।
२. सन्देहस्य।
३. बाधज्ञानम्।
४. पर्वतत्वम्।
५. अनुकूलत्वसङ्गतिः ।
६. एकस्मिन् धर्मिणि नानाधर्मावगाहिनिर्णयः।
७. सिद्ध्यबावबाधाभावपरम्।
८. पक्षताभेदः।
९. साधयितुम् इच्छा सिषाधयिषा।
१०. हेतुरेव।
११. सन्दिग्धे धर्मिणि।
१२. महर्षिगौतमः।
१३. सिषाधयिषाव्रहविशिष्टसिद्ध्यभावः पक्षता।
१४. पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका?
१५. नानुमितिः, पक्षताविरहात्।